॥ श्रीमते रामानुजाय नमः ॥ श्रीमानखिललोकानां नायकः करुणाक
रः करोतु मंगलं पुंसां कमलानायको हरिः १ अथार्थपंचकं निरूप्यते ॥
तत्र जीवस्वरूपोपायफलविरोधिनो ह्यर्थाः तत्र जीवलक्षणं शेषत्वे
सति ज्ञातृत्वं जीवत्वं ते च पंचविधाः नित्यमुक्तकेवलबद्धमुमुक्षु
भेदात् तत्र नित्याः अस्पृष्टसंसाराः अनंतगरुडविष्वक्सेनादयः जा
यमानदशायां भगवत्कटाक्षलब्धाद्वेषाभिमुख्यैः सत्संगसदाचार्योप
देशाल्लब्धसम्यग्ज्ञानार्थतत्वज्ञाननिर्मुक्तसंसारबंधाः केवलभगवत्कैंक
र्यप्रयोजना मुक्ताः केवलात्मपूर्वजन्मसुकृतानुसारेण सर्वेश्वरकृ
पया प्राप्तवर्णाश्रमधर्मानुष्ठाननिर्धूतनिखिलमलांतःकरणसंजात

१ तत्त्वज्ञाननिष्ठापराकाष्ठाविनिर्द्धूतसंसाराः केवलाविदेहस्वस्वरूपज्ञाना
नंदानुभवतत्परा मुमुक्षवः भवजनितविविधनिखिलदुःखानुभ
वोद्भूतनिर्वेदतया सांसारिकैकपारलौकिकैकसुखविमुखाः के
वलकैवल्यार्थिनः ते च द्विविधा भक्तिनिष्ठाः प्रपत्तिनिष्ठाश्चेति तत्र
भक्तिनिष्ठास्तु भगवत्कृपालब्धनिखिलनिषिद्धकर्मत्यागपूर्वकं स्व ष
शक्त्या कर्मयोगानुष्ठाननिर्द्धूतनिखिलप्रतिबंधकतया संजातत
त्त्वज्ञानपरिपाकदशोत्पन्नप्रेमणा साक्षात्कारपर्यंतेन निर्द्धूतनिखि
लदोषाः प्रारब्धनिखिलकर्मानुभवपर्यंतं विलंब्य मोक्षगामिनः
प्रपन्नाश्च तावन्मात्रविलंबासहा आकाशक्त्या चाननुरूपतया सत्य
लोक सर्वोपायाय भगवदेकोपाया मोक्षगामिनः ते च द्विविधाः ॥ ॥ १

द्वान्नभेदात् । तत्र बद्धाः । प्रारब्धदेहावसानपर्यंतं निरतिशयानंदपरम
भोग्यपतीव्रोत्सुकतया प्राप्यविरहजनितमहादुःखानभिज्ञाः । प्रा
प्तौ सत्यां संजातमिथुनकैंकर्यामृतभोगतीव्रोत्सुकतया तद्विरोधिदे
हसंबंधासहिष्णवः । बद्धास्तु अनादिकर्मवासनासंपन्ना देवतिर्यङ्
मनुष्यस्थावरात्मकचतुर्विधशरीरकृतात्माभिमानतया तत्तदनुभ
वविषयप्रावण्येन परब्रह्मानंदविमुखास्तत्तद्विषयसाधनयज्ञ
दानतपोव्रतानुष्ठानमंत्रोपासनपराः । ईश्वरतत्त्वं पंचविधं । परव्यू
हविभवांतर्याम्यर्चाभेदात् । तत्र परः । वैकुंठवासी नित्यमुक्तैकभो
ग्यः श्रीभूमिनीलासमेतः । श्रीमद्दिव्यभूषणदिव्यायुधदिव्यांबरदिव्य
स्रग्गंधलेपनालंकारोपशोभित दिव्यसौंदर्यादिपरिमित दिव्यमं

२ गलगुणविशिष्टविग्रहवाननाद्यनंतः स्वतंत्रः। ब्रह्मादीनां प्रकृतिकृत
षाड्गुण्यः। व्यूहस्तु सृष्टिस्थितिसंहारार्थं ज्ञानशक्त्यादिगुणव्यूहत्वेन
व्यूहाः। संकर्षणप्रद्युम्नानिरुद्धाः। विभवस्तु अधर्मबाधितसर्वध
र्मावलोकनाक्षमः सत्परित्राणे सद्धर्मस्थापनार्थं अधर्मनिरास
र्थं विहितावतारैर्जायमानः स च द्विविधः मुख्यगौणभेदात्। तत्र मु
ख्यादीपादुत्पन्नप्रदीपवत् प्रकटितसमस्तकल्याणगुणाश्रीकृत
पंचोपनिषन्मयदिव्यमंगलविलक्षणविग्रहविशिष्टाः रामकृष्णादि
रूपाः। गौणश्च द्विविधाः। मुख्यामुख्यभेदात्। मुख्यश्चेतनेष्वाविर्भावामु
ख्याः बलव्यासादयः। अमुख्यचेतनेष्वाविर्भावा अमुख्याः शंकरजामद
ग्न्यादयः। विश्वनियंतांतर्यामी स च द्विविधः। अविग्रहसविग्रहभेदात्। २

तत्रां विग्रहस्तु ज्ञानानंदैकस्वरूपी समस्तकल्याणगुणाकरोऽखिलहेय
प्रत्यनीकः समस्तचेतनाचेतनसत्तानिर्वाहको विष्णुनारायणवासुदेवप
रब्रह्मपरमात्मशब्दवाच्यः सर्वव्यापकः सर्वशरीरी तिलतैलवद्दारुवह्नि
वद्दुर्विवेचनीयस्वरूपः ॥ सविग्रहस्तु केवलाप्राकृतशंखचक्रादिदिव्या
युधधरः किरीटादिदिव्यभूषणभूषितः समस्तकल्याणगुणोदधिः यः
समस्तहेयप्रतिभटः सर्वशक्तिप्रवर्त्तकः समस्तभोक्ता हृषीकेशः परमपु
रुषोत्तमवासुदेवादिशब्दवाच्योऽवाङ्मयो हार्दः ॥ अर्चास्तु अर्चाविग्रहा
वतारो भक्ताधीनसमस्तव्यापारः सर्वज्ञोप्यसर्वज्ञ इव चेतनोप्यचेतन इव
स्वतंत्रोपि परतंत्र इव सर्वशक्तिरप्यशक्त इवावाप्तसमस्तकामोपि सका
म इव स

३

सर्वार्द्रकोऽसर्वार्द्रक इव स्वाम्यप्यस्वामीव च प्रद्रष्टोपि सर्वेन्द्रियविषयः 360
सुदुर्लभोपि परमसुलभ इव पुण्यदेश पुण्यस्थान पुण्यतीर्थ पुण्यन
गर पुण्यग्राम पुण्यायतन पुण्यगृह पुण्यक्षेत्रेषु कृतसन्निधानः स चतु
र्विधः स्वयंव्यक्त दिव्य सिद्ध मानुष भेदात् भक्तानुग्रहार्थं स्वयमेवावि
र्भूतं स्वयंव्यक्तं श्रीरंग श्रीमुष्णी श्रीवेंकटशालग्राम नैमिषतोताद्रि
पुष्कर नरनारायणाश्रमकं ॥ दिव्यं देवैः स्थापितं श्रीमदष्टाक्षरादिमहाव्या
पकमंत्रसिद्धाः श्रीमन्नारायणप्राप्तिफलसिद्धाः महर्षयः सिद्धा इत्यु
च्यंते तैः प्रतिष्ठापितं सिद्धं मानुषैः स्थापितं मानुषं

३

361

तद्दूनं तदं ग्रामेषु गृहेषु पुण्यदेशेषु प्रसिद्धं स्वयं व्यक्तात्समंताद्योजन
त्रयं योजनं दिव्यात् अर्द्धयोजनं सैद्धात् मानुषात् क्रोशमात्रं गृह
र्चायां गृहमात्रं शालग्रामशिलायां योजनत्रयं परव्यूहस्व पंचोप
निषन्मयं प्राकृतदिव्यमंगलविग्रहाः विभवाः सांकल्पिकशरीराः
आवेशाः पांचभौतिकाः अर्चावतारो दारुलोहशिलामृत्स्नादीनवि
ग्रहाः स्वयं व्यक्तदिव्यविमानान्यप्राकृतान्यचिन्मयानि अन्यत्सर्वं प्रा
कृतं तथापि सर्वत्रोपादानबुद्धिर्निषिद्धा देवताबुद्धिरेव कर्तव्या अ
न्यथात्मनाशो भवत्येव उपायः पंचविधः कर्मयोगज्ञानयोगभक्ति
योगप्रपत्तियोगाचार्याभिमानयोगभेदात् तत्र कर्मयोगस्तु यज्ञदा

कारणं

362

४ नतपोव्रतसंध्यावंदनपंचमहायज्ञतीर्थस्नानपुण्यदेशगमननिवा
सकृच्छ्रचांद्रायणव्रतचातुर्मास्यनियमफलमूलाशनशास्त्राभ्यासस
माराधनमंत्रजपतर्पणादिकर्मानुष्ठानेनकायशोधनंकृत्वा इंद्रियद्वा
राप्रवर्त्तमानस्यधर्मभूतज्ञानस्यशब्दादीनविषयीकृत्यपरमविषय
सापेक्षत्वमुत्पाद्ययमनियमासनप्राणायामप्रत्याहारध्यानधा
रणसमाधिरूपाष्टांगयोगक्रमेण आत्मनोविषयीकरणं तदेव
ज्ञानयोगस्यसहकारीतिऐश्वर्यप्रधानसाधनं ज्ञानयोगस्तुकर्म
योगजनितात्मज्ञानजनितस्वात्मप्रतिसंबंधिज्ञानस्यहृदयकम
लादित्यमंडलव्योमादिषुऊर्ध्वपुंड्रत्रिधामवासुदेवविष्णुनारायण ४
डु

सर्वैश्वर्यं शंखचक्रादिदिव्यायुधधरं पीतांबरालंकृतं किरीटादिदिव्य
भूषणभूषितं विलक्षणविग्रहं विषयीकृत्यानुभूयानुभूया
नुभवयोगाभ्यासबलेनानुभवकालं वर्द्धयित्वानुभवनैरंतर्यमा
दानं तदेतद्भक्तियोगस्य सहकरोति कैवल्यमोक्षस्य प्रधानसाधनं ॥
भक्तियोगस्तु ॥ तैलधारावदविछिन्नस्मृतिसंतानरूपतामापाद्यप्रा
रब्धकर्मावसानपर्यंतं पुनरनुभवप्रकर्षेण साक्षात्कारवत्त्वोपाद
ने प्रपत्तियोगस्तु एवं विधज्ञानसहकृतभक्तियोगाशक्तस्य प्राप्तिम
नश्च सुकरः शीघ्रफलदः सकृदेव हि शास्त्रार्थः स्तु यापानुष्ठानस्य
सकलात्मानुष्ठानानंतरभावि भगवद्विषयाणां सर्वेषां प्राप्यकोटिघटि

364

५ तत्वात्स्वरूपानुरूपस्याध्यवसायविशेषः स तु द्विविधः आर्तप्रप
त्तियोगः दृप्तप्रपत्तियोगश्चेति अथ दृप्तरूपा दृ[illegible] कु भगवत्कैंकर्यादेस
मनंतरं सदाचार्योपदेशमूलसच्छास्त्राभ्याससमासादितयथार्थज्ञा
नसमनंतरमानंदरूपभगवदनुभवविरोधिदेहसंबंधस्य दुस्सहतः
या भगवदनुभवैकात्यंतिकानुकूलरूपदेहदेशादेशिकप्राप्तिवांछा
दिनात्यंततत्परतया तावद्भगवदनुसंधानेन तत्परत्वोत्पादनविशे
षः तदुक्तं अभियुक्तैः न देहं न प्राणान्न च सुखमशेषाभिलषितं न चा
त्मानं नान्यत्किमपि तव शेषत्वविभवात् बहिर्भूतं नाथ क्षणमपि
सहे यातु शतधा विनाशं तत्सत्यं मधुमथन विज्ञापनमिदं न नु प्रप
न्नस्सकृदेव नाथ तवाहमस्मीति च याचमानः तवानुकंप्यः स्मरतः ५

त्तिज्ञांमदेकवर्ज्जं किमिदंवृत्तंतेदृष्टमपतिपोगस्त उपचयापचय
पदेहांतरप्राप्त्यादिष्वतद्योगभूतसुखदुःखगर्भवासेषुस्वर्गनरका
दिषुचविरक्तोभीतश्चभूत्वातन्निवृत्त्यर्थंभगवत्प्राप्त्यर्थंचसदा
चार्योपदेशप्राप्ततयाहेयोपादेयतयाविपरीतवृत्तिविनिवृत्तःवि
हितवर्णाश्रमानुष्ठानंचभगवत्कैंकर्यंकायिकंवाचिकंमानसि
कंचयथाशक्तिचानुतिष्ठन्परमात्मनःस्वस्यचशेषशेषित्वसंबंधं
भार्यापतित्वपुत्रसंबंधं [redacted] संबंधंनियंतृनियम्यसंबंधंशरीर
शरीरिसंबंधंधर्मिधर्मभावसंबंधंधारकधार्यभावसंबंधंरक्ष्य
रक्षकसंबंधंज्ञातृज्ञेयभावसंबंधंचानुसंधायतस्यचसर्वज्ञाना

मात्मनश्चाकिंचनत्वं चानुसंधाय स्वोपेयनिमित्तसर्वं मामन्यां संभ
गवत्येवारोप्य निर्भरतयाविनिवृत्तस्वप्रयत्नो भूत्वावस्थानं ॥ आ
चार्याभिमानयोगस्तु उक्तोपायेष्वशक्तस्य तदर्थं केवलयैव कृ
पयापरिग्राह्यस्वपुरुषस्यानर्थहानिमर्थप्राप्तिं च तत्प्राप्तिकारणे
वारणे च भगवत्प्रीतिं परमसमर्द्धिपरत्वोपपादकतया स्वरूप
लाभं चानुसंधाय व्याधिग्रस्तस्तनंधयपेन पपति स्वात्महानि
तद्रोगनिवर्तकौषधं सेवमानमातेव तदर्थं स्वयमेवानुष्ठानं
कुर्वंतं परमदयालुं महात्मानमाश्रित्य तत्साक्षात्कृत गृहदेव
कलत्रापत्यधनशरीरः सन्तदधीनप्रवृत्तिनिवृत्तिर्भूत्वावस्था

नं यथैस्वर्योपाधेर्नित्यसिद्धज्ञाप्यस्वरूपः सन्नेव सर्वदेवतांतर्यामितया
ध्यक्षभूतः तथाचार्योपि स्वयमनुग्राह्यः सन्नेव सर्वेषामुपायानां सह
करोति पुरुषैरर्थ्याः पुरुषार्थाः यद्वा पुरुषस्य एवार्थः पुरुषार्थः इति
स्वात्मजनितप्रीतिरित्यर्थः तदर्थतया धर्मार्था रथः पुरुषार्था इ
त्युच्यंते ते च पंचविधाः धर्मार्थकामकैवल्यभगवत्प्राप्तिभेदात्
तत्र धर्मो नाम प्राणिपरित्राणहेतुभूतप्रवृत्तिविशेषः एतदंगमे
वान्यदखिलं तथा धर्मः प्राणिपरित्राणं तद्धेतुरन्यं तु पातकं सर्वा
णि धर्मकर्माणि एतत्शेषाणि वै जग्गुः एकतः क्रतवः सर्वे समग्रवर
दक्षिणाः एकतः [illegible] भयभीतस्य प्राणिनः प्राणरक्षणं अर्थपुरु

368

१ धार्थस्तु स्ववर्णाश्रमक्रमेण धनधान्यादिकं संपाद्य संरक्ष्य संवर्द्ध्य देश
कालपात्रपितृदेवकैंकर्यसत्संभावनाग्रहदक्षिणापारितोषिकत्यागभो
गादिकृते विनियुज्य तज्जनितसुखदुःखानुभवविशेषः कामस्तु स्त्री
विषयकः शास्त्रानिषिद्धो भोगः कैवल्यं तु जरामरणमोक्षायेत्याद्युक्तप्र
कारेण प्रकृतिविमुक्तस्वात्ममात्रानुभवः परमपुरुषार्थलक्षणभगव
त्प्राप्तिस्तु घोरदुःखं दुःस्थानुभवविनाश्यतत्पादानुभावप्रयुक्तपापावसा
ने ऽस्ति जायते परिणमते विवर्द्धते ऽपक्षीयते विनश्यतीति षड्भाव
विकारयुक्ताध्यात्मिकाधिभौतिकाधिदैविकाख्यतापत्रयास्पदभग
वत्स्वरूपतिरोधायकविपरीतज्ञानजनकसंसारहेतुभूतनरकस्वर्गभो
गमोक्षान्यतमनिदानभूतं स्थूलदेहं हेयतया परित्यज्य सुषुम्णया शिरः १

कपालं भित्वा ब्रह्मरंध्रकेवलसूक्ष्मशरीरेणार्चिरादिमार्गप्रवृत्त्या सूर्यमंडलं
भित्वा प्रकृतिमुक्तीये विरजायां स्नात्वा सूक्ष्मशरीरं वासनारेणुं चावधूय
विरजो भूत्वा संकल्पादेव विरजामुक्तीये ॥ अमानवकरस्पर्शात् ध्रुवगुणस
त्वगुणविलक्षणाप्राकृतसत्वद्रव्यात्मकं पंचोपनिषण्मयज्ञानानंदप्रका
शकं भगवत्स्वरूपगुणविभूतिप्रकाशकं निरवधिकतेजोरूपं विग्रहं प्र प
त्वा ॥ अमानवदर्शितपथा तिल्यवनमासाद्य तत्रैरंमदीयापरव्यादिव्यामृ
तसरसि स्नात्वा सोमसवाश्वत्थादिव्याच्छत्यमूलं दिव्यमाणिक्यवेदिका
यां पंचशतैर्दिव्याप्सरोगणैः कृतब्रह्मालंकारस्तदनुभवजनितप्र
स्तुत्कर्षसंजाततत्पराधिक्यात् भगवत्प्रेषितस्वांतरंगपरिकराकान
जनितगमनजवोत्सवाकुलः तद्दर्शितमार्गस्वदर्शनकुतूहलाभिद्रु

तस्तत्सत्कारसमाजनितप्रतिक्षणमुद्वेल्लानंदविशेषः ॥ अतीतदिव्यजनप
दविशेषदर्शनकतूहल्लादागतनागरिकाभिद्रुतस्तत्सत्कारविशेष
परवेशो वैकुंठनगरद्वारि कृतप्रणामः प्रविश्य नगरे राजमार्गमाविश्य
तत्रदिने कांश्चर्यसाक्षात्कारप्रीतितरंगसंपातदोल्लायमानमानसः क्रे
क्रीतं क्रमेण दिव्यभवनप्राकारद्वारगोपुराणि समतिक्रम्य प्रणम्य द्वारपालै
प्रणम्य तत्सत्कृतः प्रविश्य दिव्यरत्नमयसहस्रस्थूलमंडपरत्नमाणिक्य
सोपानमार्गेण रूढ्वा ॥ अथ भक्तः विष्णुपार्षदैः सहितः संस्नेहोत्सुकं भगवंतं
नारायणं श्रीभूलीलासमेतं दिव्यरूपं शंखचक्रगदादिधरं किरीटादि
दिव्याभरणविभूषितं पीतांबरधरं दिव्यगंध दिव्यमाल्यालंकृतं सर्व
गंधं सर्वरसं सर्वस्पर्शं सर्वरूपं वाचां सर्वस्वामिनं नित्यं कैकैभोग्य
मात्मेश्वरमनुभूयानुभवजनितप्रीतिकारितकैंकर्याभिनिवेशापरि

गृहीतानेकविग्रहविधायमानसर्वदेशसर्वकालसर्वावस्थोचितकैंक
र्यातिशयजनितप्रीत्यतिशयवत्त्वं। विरोधीन्तु। विरोधोपाधेयं रूपमद्धी
ति विरोधी। सतु पंचविधः स्वस्वरूपविरोधी उपायस्वरूपविरोधी पुरु
षार्थस्वरूपविरोधी प्राप्तिस्वरूपविरोधी चेति तत्र स्वस्वरूपविरोधी
अनात्मन्यात्मबुद्धिः स्वान्यशेषबुद्धिः स्वातंत्र्यबुद्धिः। परस्वरूपविरोधी
तु देवतांतरे परत्वबुद्धिः क्षुद्रैकत्वबुद्धिस्तद्रूपवत्त्वबुद्धिः साम्यबु
द्धिर्भगवदवतारेषु मनुष्यत्वादिबुद्धिः अर्चावतारेषु उपादानबुद्धिः
अशक्तत्वबुद्धिरस्वामित्वबुद्धिः स्वातु[illegible]बुद्धिः परत्वे[illegible]त्वरा[illegible]बुद्धिर
नी[illegible]पात्वबुद्धिश्च साधनविरोधीन्तु। साधनांतरगौरवप्रतिपत्तिः उपे
यगौरवोपायलाघवप्रतिपत्तिः स्वदोषवाहुल्यप्रतिपत्तिश्च पुरुषार्थवि

392

रोधीनु । पुरुषार्थानां तदाभिनिवेशः स्वेच्छारूपानुगुणेन स्वातन्त्र्यात्स्वार्थतया
कैंकर्ये स्वनिपतितिस्त्वप्राप्ति विरोधीनु । प्रारब्ध देह संबंध स्तत्संबंधि देहस्थानु
तापश्चान्य भगवदपचार भागवतापचारासह्यापचाराश्चेतन्मध्ये चारत्रयं स्व
रूपोपायोपेयस्वरूप विरोधीनु । अन्नदोषो ज्ञानविरोधी सहवासदोषो
भोगविरोधी । एवं सजातीयं पंचकज्ञानस्य मुमुक्षोः कालक्षेपः युः कैंक
र्यतया भगवत्प्रयोजनतया च । अवश्यं कर्तव्यं संसारपातनिवारकं भूतंव
र्णाश्रमोचितवैष्णवत्वोचितं । अशेषधर्मानुष्ठानं निषिद्धकर्मवर्जनं वि
हितकर्मणान्नपानादि संपादनं संपादितद्रव्येषु स्वत्वनिवृत्तिपूर्वकं भगवत
स्वत्वानुसंधानं तत्तद्भगवदाज्ञा कैंकर्योचितार्थं विनियोगं विशेषतः स्वाचा
र्य भागवत भगवद्विग्रहहेतु वचनभूषणधारणपोषणभोजविवादिकृत्ये
षु भगवन्मंदिरनिर्माणोद्धार दिव्यविमानोद्यान दिव्यग्राम पुरदिव्यप्राकार

चंदनकुसुमतांबूलादिसकलभोगसंपादनादिषु विद्यमानार्थप्रतिपा
द्यविद्यमानपुत्रमित्रकलत्रक्षेत्रधनधान्यपशव्यादिषुममताबुद्धिःत्याग
पूर्वकंस्वाभाविकतदीयत्वमनुसंधायवैष्णवानुगतोभूत्वा श्रीवैष्णवा
न्‌सन्मार्गनिरतान्‌परित्यज्यसन्मार्गवर्त्तीभूत्वापंचकालपरस्त्वा ऽभि
गमनोपादानेज्यास्वाध्याययोगाख्येषुपंचकालेष्वाप्रसीदप्रतिपत्त्या
चमुक्त्वा स्वाचार्यभागवतभगवत्कैंकर्यैर्निर्विण्णस्तत्सन्निधौनिरं
तरवाससकुतूहलः स्वाचार्यसन्निधावज्ञातइव भागवतसन्निधौपारत
न्त्र्यंभगवत्सन्निधौस्वदोषानुसंधानंस्वाचार्यस्यसर्वज्ञतांभागवतपरत्वं
भगवत्कल्याणगुणाननुसंधायासत्संव्याघ्रविषसर्पादिष्विवातिभीतः
सर्वप्रकारेणातत्त्वहेयेषुसंसारिषुस्वस्यैवादिमतांव्यावृत्तिंचानुसंधाय

१० प्राप्यप्रापकदृढाध्यवसायजनितनिर्भरत्वभक्तितत्यक्तदेहः स्वस्पृहासंपा
दितनिरंतरानुसंधेयस्वाचरणशक्तिपरमशीलक्तत्वो भूत्वा प्रारब्धदेहा
वसानपर्यंतमेवमनुष्ठानं कुर्वन् पूर्वोक्तरीत्योक्तमार्चिरादिगत्यावाहा
दिपुरुषसंकल्पप्राप्तवैदात्मविहगेश्वरवाहनेन भगवता सह भगवत्स
रातिशयसंपन्नचरणाई कालं भगवत्प्राप्तिसंपादकभगवन्मार्गेण वा प्राप्या
नुकूलदेहसंबंधसंरक्षकभगवदनुभवजनितप्रीतिकारितकैंकर्यैश्व
र्यं समाप्नोति॥ इति परमहंसपरिव्राजकाचार्यश्रीनारायणयतीश्वरक
तावर्थपंचकप्रकरणं समाप्त॥